# संस्कृत-वार्ता:

**दिनाङ्क :-07.07.2024**

**प्रात: - 06:55**

**प्रिज-ओडिशा:**

राष्ट्रपतिः द्रौपदी मुर्मू गतसायं ओडिशा-राज्यस्य चतुर्दिवसीय- यात्रायै भुवनेश्वर-नगरम् संप्राप्तवति। राष्ट्रपतेः स्वागतं ओडिशायाः राज्यपालः रघुबरदासः, मुख्यमन्त्री मोहनचरणमाझी चेत्यादयः गणमान्यजनाः विमानस्थानके कृतवन्तः। राष्ट्रपतिः गत सायं भुवनेश्वरे उत्कलमणिपण्डितगोपबन्धुदासस्य षण्णवति तमे पुण्यतिथिसमारोहे आयोजिते कार्यक्रमे भागं भजितवति। अद्य राष्ट्रपति मुर्मू भगवत: जगन्नाथस्य, बलभद्रस्य, देव्या: सुभद्राया:, भगवतः सुदर्शनस्य च विश्वप्रसिद्धा रथयात्रायाः साक्षि भविष्यति यत् अद्य पवित्रतटीय-पुरीनगरे भविष्यति। स्वीय यात्रावधौ राष्ट्रपतिः श्व: भुवनेश्वरस्थस्य उदयगिरी-खण्डगिरी-गुहयोः यात्रां करिष्यति, बिभूति-कानुनगो-कला-शिल्प-महाविद्यालयस्य, उत्कल-संस्कृति-विश्वविद्यालयस्य च छात्रैः सह संवादं करिष्यति। भुवनेश्वरसमीपे हरिदमदा-ग्रामे ब्रह्मकुमार्याः दिव्यनिवृत्तिकेन्द्रस्य उद्घाटनं तस्मिन् एव दिने 'स्थिरतायै जीवनशैली' इति अभियानस्य आरम्भं करिष्यति। राष्ट्रपतिः दिल्लीं प्रत्यागमनात् पूर्वं मंगलवासरे भुवनेश्वरनगरे राष्ट्रियविज्ञानशिक्षा-अनुसंधानसंस्थायाः (NISER) इत्यस्य त्रयोदशतमे स्नातकसमारोहे भागं भजिष्यति।

**संसद-बजटसत्रम्:**

संसद: वित्तसंकल्पनासत्रस्य आरम्भः अस्य मासस्य द्वाविंशति दिनाङ्कात् भविष्यति। संसदीयकार्याणां मन्त्री किरेन् रिजिजुः एकस्मिन् सामाजिकान्तर्जालीय सन्देश माध्यमेन सूचितवान् यत् सत्रं अगस्त मासस्य द्वादश दिनांकपर्यन्तं निरन्तरं प्रचलिष्यति। सः अवदत्, चतुर्विंशत्यधिक द्विसहस्र पञ्चविंशत्यधिक द्विसहस्र तम वर्षस्य केन्द्रीय वित्तसंकल्पनापत्रं जुलाई त्रयोविंशति दिनाङ्के लोकसभायां प्रस्तुतं भविष्यति। श्रीरिजिजुः अवदत् यत्, राष्ट्रपतिः द्रौपदी मुर्मू भारतसर्वकारस्य अनुशंसया वित्तसंकल्पनासत्राय संसदः द्वयोः सदनयोः आह्वानस्य प्रस्तावस्य अनुमोदनं कृतवति। संसदीयकार्याणां राज्यमन्त्री अर्जुनराममेघवालः दृष्यांकन-माध्यमेन अवदत् यत् आर्थिकसर्वक्षणप्रतिवेदनं जुलाई मासस्य द्वाविंशतिः दिनाङ्के प्रस्तुतं भविष्यति। नरेन्द्रमोदीसर्वकारस्य तृतीयकार्यकालावधौ प्रस्तुतं प्रथमं वित्तसंकल्पनापत्रं भविष्यति।

**प्रधानमन्त्री/ब्रिटन**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः ब्रिटेनस्य प्रधानमन्त्रीरूपेण निर्वाचितेन कीर स्टारमर इत्यनेन सह वार्तालापं कृत्वा शुभकामनाः प्रदत्तवान्। एकस्मिन् सामाजिकसंचारपटले श्रीमोदी अवदत् यत्, उभयोः देशयोः जनानां प्रगतेः समृद्धेः वैश्विक-हिताय च सुदृढ-भारत-ब्रिटेन-आर्थिक-सम्बन्धयोः गभीरीकरणाय उभौ पक्षौ प्रतिबद्धौ स्तः। प्रधानमन्त्रिणा नरेन्द्रमोदिना इस्लामिकगणराज्यस्य इरान्-देशस्य राष्ट्रपतित्वेन निर्वाचितस्य मसूद-पेजेश्कियां-इत्यस्य अभिनन्दनं कृतम्। सामाजिकसंचारपटले श्रीमोदी अवदत् यत् भारत इरान्-देशयो: जनानां क्षेत्रस्य च हिताय मधुरं दीर्घकालिकं च द्विपक्षीयं सम्बन्धं इतोप्यधिकं सुदृढं कर्तुं पेजेश्कियां-महोदयेन सह निकटतया कार्यं कर्तुं उत्सुकः अस्ति।

-

**भारत जिंबोंब**

क्रिकेट्-क्रीडायां गतसायं हरारे-इत्यत्र पञ्चात्मिक्याः-श्रृङ्खलायाः प्रथमे- विंशतिः प्रति विंशतिः-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडायां जिम्बाब्वे-दलेन भारतं त्रयोदश धावनांकैः पराजितम्। भारतेन पणकं विजित्य प्रथमं कंदुकक्षेपणं चितम्।

**।।इति वार्ता:।।**